# Munibhih Kritam 2 Shri Krishna Stotram

# મુનિભિઃ કૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Munibhih Kritam 2 Shri Krishna Stotram

File name : munibhiHkRRitaM2shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/84/16-26||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 4, 2025

*sanskritdocuments.org*

# મુનિભિઃ કૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

મુનય ઊચુઃ ।
યન્માયયા તત્ત્વવિદુત્તમા વયં
વિમોહિતા વિશ્વસૃજામધીશ્વરાઃ ।
યદીશિતવ્યાયતિ ગૂઢ ઇહયા
અહો વિચિત્રં ભગવદ્વિચેષ્ટિતમ્ ॥ ૧૬॥

અનીહ એતદ્બહુધૈક આત્મના
સૃજત્યવત્યત્તિ ન બધ્યતે યથા ।
ભૌમૈર્હિ ભૂમિર્બહુનામરૂપિણી
અહો વિભૂમ્નશ્ચરિતં વિડમ્બનમ્ ॥ ૧૭॥

અથાપિ કાલે સ્વજનાભિગુપ્તયે
બિભર્ષિ સત્ત્વં ખલનિગ્રહાય ચ ।
સ્વલીલયા વેદપથં સનાતનં
વર્ણાશ્રમાત્મા પુરુષઃ પરો ભવાન્ ॥ ૧૮॥

બ્રહ્મ તે હૃદયં શુક્લં તપઃસ્વાધ્યાયસંયમૈઃ ।
યત્રોપલબ્ધં સદ્વ્યક્તમવ્યક્તં ચ તતઃ પરમ્ ॥ ૧૯॥

તસ્માદ્બ્રહ્મકુલં બ્રહ્મન્ શાસ્ત્રયોનેસ્ત્વમાત્મનઃ ।
સભાજયસિ સદ્ધામ તદ્બ્રહ્મણ્યાગ્રણીર્ભવાન્ ॥ ૨૦॥

અદ્ય નો જન્મસાફલ્યં વિદ્યાયાસ્તપસો દૃશઃ ।
ત્વયા સઙ્ગમ્ય સદ્ગત્યા યદન્તઃ શ્રેયસાં પરઃ ॥ ૨૧॥

નમસ્તસ્મૈ ભગવતે કૃષ્ણાયાકુણ્ઠમેધસે ।
સ્વયોગમાયયાચ્છન્નમહિમ્ને પરમાત્મને ॥ ૨૨॥

ન યં વિદન્ત્યમી ભૂપા એકારામાશ્ચ વૃષ્ણયઃ ।
માયાજવનિકાચ્છન્નમાત્માનં કાલમીશ્વરમ્ ॥ ૨૩॥

યથા શયાનઃ પુરુષ આત્માનં ગુણતત્ત્વદૃક્ ।
નામમાત્રેન્દ્રિયાભાતં ન વેદ રહિતં પરમ્ ॥ ૨૪॥

એવં ત્વા નામમાત્રેષુ વિષયેષ્વિન્દ્રિયેહયા ।
માયયા વિભ્રમચ્ચિત્તો ન વેદ સ્મૃત્યુપપ્લવાત્ ॥ ૨૫॥

તસ્યાદ્ય તે દદૃશિમાઙ્ઘ્રિમઘૌઘમર્ષ-
તીર્થાસ્પદં હૃદિ કૃતં સુવિપક્વયોગૈઃ ।
ઉત્સિક્તભક્ત્યુપહતાશયજીવકોશા
આપુર્ભવદ્ગતિમથોઽનુગૃહાણ ભક્તાન્ ॥ ૨૬॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે ઉત્તરાર્ધે ચતુરશીતિ-
તમાધ્યાયાન્તર્ગતં મુનિભિઃ કૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૮૪/૧૬-૨૬॥

bhAgavatapurANa . adhyAya 10/84/16-26..

Proofread by PSA Easwaran

*Munibhih Kritam 2 Shri Krishna Stotram*
pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*